क्र.नं. ७४

संस्कृत

याज्ञिक.
विधि:

# "जलोत्सर्गविधी."

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

३७८४

(1) श्रीविघ्नहर्त्रे नमः ॥ अथ वापीकूपतडागोत्सर्गविधिः ॥ तत्र प्रयोगः ॥ कृतमंग
लस्नानः स्वलंकृतः कृताचमनः प्राङ्मुखो यजमानो वस्त्राच्छादितपीठे जला
शयपश्चिमभागे उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेश्य ज्योतिर्विद्
के काले देशकालौ संकीर्त्य ॥ मम सर्वपापक्षयपूर्वकं रुद्रालयगमनेनैकक
ल्पव्यापिस्वर्गलोकहर्षपरार्द्धप्रकालव्यापि महत्तपःप्रभृतिलोकांगनास
हितभोगपूर्वकांगनासहितपरमविष्णुपदप्राप्तिकामोऽमुकजलाशयो
त्सर्गं करिष्ये इति संकल्प्य तदंगं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मा
तृकापूजनपूर्वकं नांदीश्राद्धमाचार्यादिवरणं ग्रहयज्ञं मंडपप्रतिष्ठां च करिष्ये।
तत्र गणपतिपूजनादिनांदीश्राद्धांतं कृत्वाऽऽचार्यं वृणुयात् ॥ तत्र मंत्रः ॥ आ

१ चार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः॥ तथा त्वं मम यज्ञेस्मिन्नाचार्यो भ
व सुव्रत॥ इत्युक्त्वाचार्यं वृणुयात्॥ वृतोस्मीति वदेत्॥ यथा चतुर्मुखो ब्रह्मा स्वर्ग
लोके पितामहः॥ तथा त्वं मम यज्ञेस्मिन्ब्रह्मा भव द्विजोत्तम इति ब्रह्माणं वृणुया
त्॥ एवं ऋत्विग्गोदिवरणं कृत्वा वरणक्रमेण मधुपर्कादि पूजां कुर्यात्॥ त
त आचार्यो गौरसर्षपान्विकिरेत्॥ यत्रेदं संस्थितं भूतं स्थाने माश्रित्य स
र्वदा॥ स्थानं सत्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ अपक्रामंतु भूतानि पिशा
चाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभेत्॥ ततः कुशैः पं
चगव्येन सर्वत्र प्रोक्षेत्॥ शुचीवो हव्येति तृचेन आपो हिष्ठेति तृचेन स्वस्त्य
यनं तार्क्ष्यमिति मंत्रद्वयं पठेत्॥ ततः मंडपपश्चिमे मंडपदेवतास्थापनपूज २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

नं च कृत्वा ततो वाद्यादिघोषे जायमाने हरिद्राकुंकुमादिरंजितेन त्रिवृता मंगलसू
(2A) त्रेण जलाशयमीशानीमारभ्य वेष्टयेत्॥ ततो जलाशयस्य पूर्वादिदिक्षु क्रमेणं इं
द्रादीन्स्थापयेत्॥ तत्र क्रमः॥ ततः पूर्वे मही द्यौरिति भूमिं स्पृष्ट्वा॥ ओषधयः सामिति
यवान्निक्षिप्य॥ आकलशेषु धावतीति कलशान्निधाय॥ इमं मे गंगे इति जलमापूर्य॥ गं
धद्वारामिति गंधं॥ या ओषधीरिति सर्वौषधीः॥ ओषधयः समिति यवा
न्॥ कांडात्कांडादिति दूर्वाः॥ अश्वत्थे व इति पंचपल्लवान्॥ स्योना पृथिवी
ति सप्तमृदः॥ याः फलिनीरिति फलं॥ स हि रत्नानीति पंच रत्नानि॥ हिरण्यरू
वस्त्रे ३ प इति हिरण्यं॥ युवा सुवासा इति सूत्रेण वेष्टयेत्॥ पूर्णा दर्वीति परि धान्य
पात्रं २ पूर्णशरावं निधाय॥ तत्र सुवर्णनिर्मितां इंद्रप्रतिमां त्रातारमिंद्रमिति
स्थापयेत्॥ इंद्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः॥ शतयज्ञाधिपो देवस्त

२ स्मैनित्यंनमोनमः॥ इत्यनेनपूजांविधाय॥ ततआग्नेय्यांगत्वापूर्ववन्महीद्यौ
रित्यादिक्रमेणैकैकंकलशंनिधायतत्राग्निप्रतिमांत्वंनोअग्नेतिअग्निंस्था
पयेत्॥ आग्नेय्यः पुरुषो रक्तः सर्वदेवमयोव्ययः॥ धूमकेतुरजोध्यक्षस्त
(3) स्मैनित्यंनमोनमः॥ अनेनाग्निंसंपूज्य॥ ततोदक्षिणेपूर्ववत्कलशंनिधा
यतत्रयमप्रतिमांयमायसोमम् इति स्थापयेत्॥ महामहिषमारूढंदंड
हस्तंमहाबलं॥ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां॥ इतियमंपू
जयित्वा॥ ततोनैरृत्यांपूर्ववत्कलशंनिधायतत्रमोषुणइतिनिरृतिप्र
तिमांस्थापयेत्॥ निरृतिंखड्गहस्तंचसर्वलोकैकपावनं॥ आवाहयामिय
ज्ञेस्मिन्पूजेयंप्रतिगृह्यतां॥ इतिनिरृतिंपूजयेत्॥ ततःपश्चिमेपूर्ववत्
कलशंनिधायतत्रवरुणप्रतिमांतत्वायामीतिस्थापयेत्॥ पाशहस्तोचव २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वरुणमपांपतिमीश्वरं॥ आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतामिति वरुणं प्र
3A जयेत्॥ ततो वायव्ये पूर्ववदेकं कलशं स्थाप्य तत्र वायुप्रतिमां तव वायो इति स्थापयेत्।
वायुमाकाशपंचेव पवनं वेगवत्तरं॥ आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यता
मिति वायुं पूजयेत्॥ तत उत्तरे देशे पूर्ववत् कलशं स्थाप्य तत्र सोमप्रतिमां सोमो धे
नुमिति स्थापयेत्॥ सर्वनक्षत्रमध्येषु सोमो राजा व्यवस्थितः॥ तस्मै सोमाय देवा
य नक्षत्रपतये नमः॥ इति सोमं पूजयेत्॥ तत ईशान्यां पूर्ववत्कलशं निधाय तत्र
ईशानप्रतिमां तमीशानमिति स्थापयेत्॥ वृषस्कंधरसमारूढं श्लद्कहस्तं त्रिलो
चनं॥ आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यतामितीशानं पूजयेत्॥ ततः जलाश
यान्तस्थित एव यजमानः आचम्य प्राणानायम्याऽमुकजलाशयोत्सर्गकर्मणि
वारुणदेवतास्थापनं करिष्य इति संकल्प्य॥ तत्र क्रमः॥ पीठे वस्त्रे वा वारुणमंडलं लि
खेत्॥ पूर्वायतास्तु पंच रेखास्तथान्यवोत्तरायताः॥ तंडुलैः परिकर्तव्याः पंचविंशति

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

२ कोष्ठका॥ मध्ये ब्रह्माणं॥ ब्रह्मजज्ञानं गोतमो वामदेवो ब्रह्मा त्रिष्टुप्॥ ब्रह्मस्थापने वि०
एवमुत्तरत्र॥ ॐ० भूर्भुवः स्वः ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ ॐ भूर्भुवः स्वः ब्रह्मन्निहाग
(5) च्छेह तिष्ठेति मध्ये ब्रह्माणमावाहयामि प्रतिष्ठापयामि पूजयामि नमः॥१॥ उत्तरे सोमं॥
आप्यायस्व गोतमः सोमो गायत्री॥ सोमावाहने वि०। ॐ० ॐ आप्यायस्व समेतु ते वि
श्वतः सोम वृष्ण्यं॥ भवा वाजस्य संगथे॥ ॐ० सोमेहागच्छेह तिष्ठेति उत्तरे सोमं०२॥
तत ईशान्यामीशानं॥ अभित्वाऽजीगर्तिः शुनःशेप ईशानो जगती। ईशानावाह
ने वि०। ॐ० ॐ अभि त्वा देव सवितरीशानं वार्याणां॥ सदावन्भागमीमहे॥ ॐ ईशा
नेहागच्छेह तिष्ठेति ईशान्यामीशानं॥३॥ पूर्वे इंद्रं॥ इंद्रं वो मधुच्छंदा इंद्रो गायत्री॥
इंद्रावाहने वि०। ॐ० ॐ इंद्रं वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केव
लः। ॐ० इंद्रेहागच्छेह तिष्ठेति पूर्वस्यां इंद्रं०॥४॥ आग्नेय्यामग्निं॥ अग्निं काण्वो मे

धातिथिरग्निर्गायत्री। अग्न्यावाहने वि॰। ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं॥
(4A) अस्य यज्ञस्य सुक्रतुं। ॐ॰ अग्न इहागच्छेह तिष्ठ स्वाग्नेय्यामग्निं॥५॥ दक्षिणे यमं।
यमाय सोमं यमो यमोनुष्टुप्॥ यमावाहने वि॰॥ ॐ यमाय सोमं सुनुत यमाय जुहु
ता हविः। यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः। ॐ॰ यम इहागच्छेह तिष्ठेति दक्षि
णस्यां यमं॰॥६॥ निर्ऋत्यां निर्ऋतिं। मो षु णः घोरः कण्वो निर्ऋतिर्गायत्री॥ निर्ऋत्या
वाहने वि॰। ॐ भू॰ मो षु णः परा परा निर्ऋतिर्दुर्हणा वधीत्। पदीष्ट तृष्णया सह॥
ॐ॰ निर्ऋत इहागच्छेह तिष्ठेति नैर्ऋत्यां निर्ऋतिमा॰॥७॥ पश्चिमे वरुणं। तत्त्वा या
मि शुनःशेपो वरुणस्त्रिष्टुप्॥ वरुणावाहने वि॰॥ ॐ॰ तत्त्वा यामि ब्रह्मणा वंदमा
नस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मान

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

४ आ पुः प्र मोषीः। ॐ० वरुणेहागच्छेह तिष्ठेति पश्चिमस्यां वरुण मा०।८। वायव्यां
वायुं। तव वायो व्यश्वांगिरसो वायुर्गायत्री। वायव्यावाहने वि०। तव वायवृत तस्य
ते त्वष्टुर्जामातरद्भुत॥ अवांस्यावृणीमहे॥ ॐ० वायो इहागच्छेह तिष्ठेति वाय
(5) व्यां वायुमा०।९। वायुं सोमम मध्ये ध्रुवसवः। ज्मया अत्र मैत्रावरुणो वसिष्ठो
वसव स्त्रिष्टुप्। वस्वावाहने वि०। ॐ० ज्मया अत्र वसवो रंत देवा उरावंतरि
क्षे मर्जयंत शुभ्राः। अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो
अस्य॥ ॐ० वसवो त्रागच्छथा[illegible] तिष्ठतेति आवा०।१०। सोमेशान मध्ये ए
कादश रुद्राः। आ रुद्रास इति श्यावाश्व एकादश रुद्रा जगती रुद्रावाहने वि०। ॐ
० आ रुद्रास इंद्रवंतः सजोषसो हिरण्यरथाः सुविताय गंतन॥ इमं वो अ

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan ... Mumbai

(5A)

स्मत्प्रतिहर्यते मतिस्त्वन्नजेन दिदृक्षुत्सा उदन्यवे ॥ ॐ॰ रुद्राइहागच्छेहति
ष्ठतेति आ॰ ॥११॥ ईशानेंद्रमध्ये द्वादशादित्यान् ॥ सानुसामदोमत्स्यो द्वाद
शादित्यागायत्री ॥ ईशानेंद्रमध्ये द्वादशादित्यावाहनेवि॰ ॥ ॐ॰ सान्नुदत्त
त्रियाँ अव आदित्यान्याचिषामहे ॥ सुमृळीकाँ अभिष्टये ॥ ॐ॰ द्वादशादित्या
इहागच्छतेहतिष्ठते सावकाल तो ॥ शानेंद्रमध्ये द्वादशादित्यानावा॰ ॥१२॥ इंद्राग्निम
ध्येऽश्विनो ॥ आश्विनावर्तिरस्मदागोमतीमाऽश्विनावनुष्टिक्रु ॥ अश्विनावाह
नेवि॰ ॥ ॐ॰ अश्विनावर्त्तिरस्मदागोमद्दस्राहिरण्यवत् ॥ अर्वाग्रथं समन
सानियच्छतं ॥ ॐ॰ अश्विनावत्रागच्छेतेहातिष्ठेतेंद्राग्निमध्येऽश्विनावा॰ ॥
१३ ॥ अग्नियममध्ये सप्तमातरः ॥ इमं मे गंगेति सिंधुक्षित्प्रैषमेधानद्योज
गती ॥ सप्तमात्रावाहनेवि॰ ॥ ॐ भू॰ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

५ स्वतापरुहस्या। आसिक्न्यामरुद्वृधे वितस्तयार्जीकीये शृणुह्यासुषोमया॥ॐ०
सप्तमातरः इहागच्छतेहातिष्ठतेति अग्नियममध्ये सप्तमातृनावा०१४।
यमनिर्ऋतिमध्ये गणपति॥गणानांत्वागृत्समदोगणाधिपतिर्जगती॥गणप
(६) त्यावाहने विनि०ॐ० गणानांत्वागणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं॥
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीदसादनं॥ॐ० गणपतइहागच्छ
हातिष्ठेति यमनिर्ऋतिमध्ये गणपति मा०१५॥ निर्ऋतिवरुणमध्ये ष्टत नागान्॥आ
यं गोः सार्पराज्ञी सर्पागायत्री॥ अनंतावाहने वि०ॐ० आयं गोः पृश्निरक्रमीदस
दन्मातरं पुरः। पितरं च प्रयन्त्स्वः।ॐ० [illegible] तनागा इहागच्छत हातिष्ठतेति निर्ऋतिव
रुणमध्ये नागानावा०१६॥ वरुणवायुमध्ये गंधर्वाप्सरसः। अप्सरसमेतलोक
व्यश्टंगो गंधर्वाप्सरसोनुष्टुप्॥ अप्सरसावाहने वि०ॐ० अप्सरसां गंधर्वाणांमृ

गाणांत्वरणेन्व रनू।केशा केतंस्य विद्वान्सखा स्वादुर्मूर्दितमः।ॐ• अप्सरस इहागछ
तेहातिष्ठतेति वरुण वायुमध्ये गंधर्वाप्सरस आ•।१७। ब्रह्मसोममध्ये वृषभं। ऋषभ
मृषभो वेराऊ। ऋषभोनुष्टुप। ऋषभावाहने वि•।ॐ• ऋषभं मा समानानां सपत्नानां
विषासहिं॥ हंतारं शत्रूणां कृधि विराजं गोपतिं गवां।ॐ• ऋषभेहागछेहतिष्ठति
ब्रह्मसोममध्ये ऋषभमा•।१८। ब्रह्मेशानमध्ये साध्याः। यज्ञेन यज्ञमिति नारायणः
पुरुषोनुष्टुप्। साध्यावा•।ॐ• यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यास
न्।ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥ॐ• साध्या इहागछेह
तिष्ठतेति ब्रह्मेशानमध्ये साध्यानावा•।१९। ब्रह्मेंद्रमध्ये विष्णुः। इदं विष्णुर्मेधाति
थिर्विष्णुर्गायत्री विष्णुवाहने•।ॐ• इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। सम्
ढमस्य पांसुरे।ॐ भू• विष्णो इहागछेह तिष्ठतेति ब्रह्मेंद्रमध्ये विष्णुमा•।२०।

६ ब्रह्माग्निमध्येपितृभ्यः। उदीरतामिति यस्य शंखः पितरस्त्रिष्टुप्। पितॄनावाहने वि०। ॐ
उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुंय ईयुरवृका ऋतज्ञा
स्ते नोवंतु पितरो हवेषु। ॐ पितर इहागच्छतेह तिष्ठतेति ब्रह्माग्निमध्ये पितॄना
(४) वा०।२१। यम ब्रह्मयोर्मध्ये अंतकाय। मोषुणो घोरः कण्वः कालो गायत्री। काला
वाहने वि०। ॐ मोषुणः परापरा निर्ऋतिर्दुर्हणा वधीत्। पदीष्ट तृष्णया सह। ॐ
अंतकाले हागच्छेह तिष्ठेति यमब्रह्मणोर्मध्ये अंतकालमा०।२२। ब्रह्मनिर्ऋतिम
ध्ये मृत्युरोगाः। परं मृत्यो संकुसुको मृत्युस्त्रिष्टुप्। मृत्युरोगावाहने वि०। ॐ परं
मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि
मा नः प्रजां रीरिषो मोत वीरान्। ॐ मृत्युरोगेहागच्छेह तिष्ठेति ब्रह्मनिर्ऋतिम ३१

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "Joint project of the Rajawade Sanshodhan Mandal"

(७P)

ध्येमसुरोगानाः॥२३॥ ब्रह्मवरुणमध्ये आपः। अप्सुमेधातिथिरापोनुष्टुप्। आप
आवाहने वि०। ॐ० अप्सुमे सोमो अब्रवीदंतर्विश्वानिभेषजा। अग्निंच विश्वशंभुवमा
पश्चविश्वभेषजी॥ॐ० आपइहागच्छते हा तिष्ठते ति ब्रह्मवरुणमध्ये आपआ
वा०॥२४॥ ब्रह्मवायुमध्ये चित्रगुप्तं। उषोवाज० प्रस्कण्वश्चित्रगुप्तो बृहती। चित्रगुप्ता
वाहने वि०। ॐ० उषोवाजंहिवं स्वयं चित्रोमानुषाजने। तेनावहसुकृतो अध्वरांउ
पयेत्वा गृणंति वन्हयः। ॐ० चित्रगुप्त इहागच्छ इह तिष्ठ इति ब्रह्मवायुमध्ये चित्रगुप्त
मावा०॥२५॥ ब्रह्मणः पादमूलेपृथ्वी। स्योनामेधातिथिर्भूमिर्गायत्री। भूम्यावाहने
वि०। ॐ० स्योनापृथिविभवा नृक्षरानिवेशनी। यच्छानः शर्मसप्रथः। ॐ० भूर्भु
वः स्वः ॐ पृथिवी इहागच्छ इह तिष्ठ इति ब्रह्मणः पादमूले पृथ्वी आवाहयामि प्रति
ष्ठापयामि पूजयामि नमः। इति सर्वान्प्रतिष्ठाप्य षोडशोपचारैः संपूज्य॥ ॥

७ ततऋत्विजः। ऋग्वेदं पूर्वतो न्यस्य यजुर्वेदं तु दक्षिणे। पश्चिमे सामवेदं तु उत्तरे ऽथर्ववे
दिनं॥ अग्निमीळे पुरोहितमिति ऋग्वेदं पूर्वे ऽउपेयुः। इषे त्वोर्जे त्वा वायव स्थोपायव
(४) स्थ इत्यनुवाकचतुष्टयं दक्षिणे ऽउपयुः। अग्न आयाहि वीतय इत्यादि यथासंभवं
पश्चिमे सामानि ऽउपयुः। शन्नो देवीरभिष्टय इत्यथर्ववेदिनो उत्तरद्वारे ऽउपयुः॥ ॥
ततो वरुणमंडलमध्ये आकलशे। [illegible]ति मंत्रेण कलशं ताम्रमयं यथोक्तलक्ष
णं प्रतिष्ठाप्य कलशमध्ये जलं पंचर[illegible]व पंचपल्लवं सप्तमृदं पंचामृतं पंचगव्य
मष्टगंधं सर्वौषधीर्दूर्वाः पुगीफलं[illegible]च निक्षिप्य सूत्रेण वेष्टयेत्॥ ततः क
लशोपरि वस्त्रयुतां पंचरत्नकूर्ममकरादियुतां सुवर्णपात्रीं। इमंमे वरुणः शु
नःशेपो वरुणो गायत्री। सुवर्णपात्रीस्थापने विनि०। ॐ इमंमे वरुण श्रुधी हव
मद्या च मृळय॥ त्वामवस्युराचके। इति मंत्रेण स्थापयेत्॥ ततः सुवर्णपात्र्यु

(8A)

परिमाषमितां सुवर्णमयीं वरुणप्रतिमां मधिदेवताप्रत्यधिदेवतासहितांच संपाद्य।
अग्न्युत्तारणादि कृत्वा तत्त्वायामीति मंत्रेण वरुणप्रतिमां मध्ये स्थापयेत्॥ तद्दक्षिण
पार्श्वे ब्रह्मजज्ञानमिति अधिदेवतां श्रीं ब्रह्माणं स्थापयेत्॥ तदुत्तरपार्श्वे कद्रुद्रायेति
रुद्रप्रत्यधिदेवतां स्थापयेत्॥ एता स्थापयित्वा तद्गंधस्विस्त्यादिना प्रतिष्ठाप्य षोडशोप
चारैः संपूज्य॥ वारुणानि ब्राह्मानि रौद्राणि सूक्तानि वा जपेत्॥ ततआचार्यो वरुण
मंडलस्य पश्चिमभागे कुंडे स्थंडिले वा गृह्योक्तविधिपूर्वकमग्निं प्रतिष्ठाप्य ग्रहादी
न्स्थापयेत्॥ ततो यजमानः स्थंडिलस्य ईशान्यभागे नवग्रहपीठे अद्येत्यादि मुक्तजला
शयोत्सर्गकर्मणि सूर्यादिदेवतास्थापनं करिष्य इति संकल्प्य तत्तन्मंत्रैः प्रतिष्ठाप्य।
षोडशोपचारैरभ्यर्च्य वरुणमंडलस्योत्तरे वास्तुमंडलं विधाय तत्र ब्रह्मादिपि
लिपिछांता देवतास्तत्तन्मंत्रैरुत्करीत्या प्रतिष्ठाप्य वास्तुमंत्रेण वा वास्तुमूर्तिं च प्रति

The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

शाप्यषो उत्रोपचारैरभ्यर्च्यान्वाधानं कुर्यात्॥ तद्यथा॥ सामिद्ध्यं त्रयं वा दायदेश
८ कालौ स्मृत्वा मया क्रियमाणे ऽमुकजलाशयोत्सर्गकर्मणि देवतापरिग्रहार्थ
मन्वाधानं करिष्ये। अस्मिन्नन्वाहिते ग्नौ इत्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा ऽ
त्र प्रधानं वरुणप्रति द्रव्यं अष्टोत्तरशतसंख्यया उदुंबरसमिच्चर्वाज्येन अ
(९) धिदेवताः प्रत्यधिदेवतानां च अष्टाविंशतिसंख्यया प्रत्येकं तिलाज्यद्रव्येण आ
पश्चतुर्वारमाज्येन तथा च नवग्रहाणां प्रत्येकमष्टसंख्यया तिलाज्येन अर्कादिसमिद्भि
श्च ततो वारुणवास्तुमंडलादिदेवतानां [illegible] वारुणवास्तुदेवतास्तावन्मन्वाधाने।
ब्रह्माणं १ सोमं २ ईशानं ३ इंद्रं ४ अग्निं ५ यमं ६ निर्ऋतिं ७ वरुणं ८ वायुं ९ अष्टौ
वसून् १० एकादश रुद्रान् ११ द्वादशादित्यान् १२ अश्विनौ १३ सप्तमातॄः १४ ग
णपतिं १५ भूतनागान् १६ गंधर्वाप्सरसः १७ वृषभं १८ साध्याः १९ विष्णुं २०

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

पितॄन् २१ अंतकालं २२ मत्स्य रोगान् २३ आपः २४ चित्रगुप्तं २५ पृथ्वी २६ एताः षड्विंश
तिर्देवतोऽधेऽधौ मेंडले प्रत्येकमेकैका हुतिं तिलाज्यद्रव्येण पुनरत्र प्रधानं॥ ब्रह्माणं १
वास्तोष्पतिं १ विष्णुं २ पृथ्वी ३ लक्ष्मी ४ सरस्वती ५ गौरी ६ ईशानं ७ अर्यमणं ८ सवि
तारं ९ विवस्वतं १० बुधाधिपतिं ११ मित्रं १२ राजयक्ष्माणं १३ पृथ्वीधरं १४ आपव
त्सं १५ आपः १६ सावित्रं १७ जयं १८ रुद्रं १९ शिखिनं २० पर्जन्यं २१ जयंतं २२ कुलि
शायुधं २३ सूर्यं २४ सत्यं २५ भृशं २६ आकाशं २७ वायुं २८ पूषणं २९ वितथं ३०
गृहक्षत्रं ३१ यमं ३२ गंधर्वं ३३ भृंगराजं ३४ मृगं ३५ पितॄन् ३६ दौवारिकं ३७
सुग्रीवं ३८ पुष्पदंतं ३९ वरुणं ४० असुरं ४१ शोकं ४२ पापयक्ष्माणं ४३ रोगं ४४ अ
हिं ४५ मुख्यं ४६ भल्लाटं ४७ सोमं ४८ सर्पान् ४९ अदितिं ५० दितिं ५१ चरकीं ५२ विदा
रीं ५३ पूतनां ५४ पापराक्षसीं ५५ स्कंदं ५६ अर्यमणं ५७ जंभकं ५८ पिलिपिच्छं ५९

२४

१

(10)

एताः वास्तुमंडलदेवताः प्रत्येकं एकैकाहुतिं तिलाज्यद्रव्येण शेषेण स्विष्टकृत
मित्यादि पूर्णपात्रनिधानांतं कृत्वा निर्वापकाले तूष्णीं चतुरश्चतुरो मुष्टीन्निरु
प्य तत्संख्यया तूष्णीं प्रोक्षण अवघातादि आज्यभागांते कृते प्रधानहोमः॥ ॥
तत्त्वायामीति पंचानां शुनःशेपो वरुणस्त्रिष्टुप् उदुंबरसमिद्धोमे वि०॥ अभावे आ
ज्यहोमे तु आज्यहोमे विनियोगः कार्यः तथैव सर्वत्रापि॥ ॥ॐ तत्त्वा यामि ब्रह्मणा वंद
मानस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न आ
युः प्रमोषीः॥ स्वाहा॥ वरुणायेदं न मम॥१॥ एवमग्रेपि। तदिन्नक्तं तद्दिवा मह्यमा
हुस्तदयं केतो हृद आविचष्टे। शुनःशेपो यमह्वद्गृभीतः सोऽअस्मान्राजा वरु
णो मुमोक्तु॥ स्वाहा॥२॥ शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः। अवैनं
राजा वरुणः ससृज्याद्विद्वाँ अदब्धो विमुमोक्तु पाशान्॥ स्वाहा॥३॥ अवते हेळो व

२४

रुण नमोभिरवयज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनां
सि शिश्रथः कृतानि। स्वाहा।४।उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथा
य। अथा वयमादित्य व्रते तवानागसो अदितये स्याम। स्वाहा।५।त्वन्नो अग्ने वरु
णस्य वामदेवो ग्निर्वरुणो त्रिष्टुप् पूर्ववद्विनियोगः। ॐ त्वं नो अग्ने वरुणस्य विद्वान्देव
स्य हेळो व यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्य
स्मत्। स्वाहा।६। स त्वन्नो अग्ने वामदेवो वरुणो त्रिष्टुप्। विनियोगः प्राग्वत्।। स त्वं नो
अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।। अव यक्ष्व नो वरुणं रराणो वीहि
मृडीकं सुहवो न एधि। स्वाहा।७। इमं मे शुनःशेपो वरुणो गायत्री। प्राग्वद्विनि०
ॐ इमं मे वरुण श्रुधी हवमद्या च मृळय। त्वामवस्युराचके। स्वाहा।८। इत्येभि
र्वारुणैर्मंत्रैरेभिश्चतुर्भिश्चतुर्दशावृत्त्या अन्यैश्चतुर्भिस्त्रयोदशावृत्त्या इत्यष्टो
त्तरशतमाहुतीः प्रतिद्रव्यं जुहुयात्।। इति वरुणप्रधानहोमः।। समुद्रज्येष्ठा इति च

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com